Reg. No. | | | | | | | | |

# BASSKL 252

**Credit Based IV Semester B.A. Degree Examination, April/May 2017**
**(2015-16 and Earlier Batches)**
**SAMSKRITHAM**
**Samskritham Language**

Time : 3 Hours Max. Marks : 80

*सूचना : 1) चतुर्थ, अष्टम, नवमप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत।*
*2) इतर प्रश्नानाम् उत्तराणि संस्कृतभाषया, आंग्लभाषया, कन्नडभाषया वा लेखितण्यानि।*

1. अधोनिर्दिष्टगद्यभागेषु द्वयोः अनुवादं कुरुत। **(2×5=10)**

1.1) प्रपञ्चे सर्वभूतेषु मानवः अतिविशिष्टः। मानवः इति शब्दः एव सूचयति यत् तस्य प्रधानक्रिया मनसः एव। इदं मनोचैतन्यम् उपयुज्य शरीरं वाचं मनः च शुद्धीकृत्य सामान्यं मानवं चित्तस्वास्थ्यसहितं विश्वमानवं परिवर्तयितुं निर्मितः विशिष्टः मार्गः पतञ्जलियोगः। मानवस्य चित्तस्य चाञ्चल्यमेव मूलं कारणं सर्वेषां दुःखानाम्। सः चित्तवृत्तीनां दासः भूत्वा बन्धितः। अहमिति भ्रान्त्या दुःखमनु भवति। यदा सः चित्तवृत्तिभ्यः बहिरागत्य चित्तवृत्तिनिरोधं कर्तुं समर्थो भवति तदा सः मुक्तः इति कथयति महर्षिः पतञ्जलिः।

1.2) जानपदो अभिजातः स्ववग्रहः कृतशिल्पः चक्षुष्मान् प्राज्ञः धारयिष्णुः दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमान् उत्साह-प्रभावयुक्तः क्लेशसहः शुचिः मैत्रः दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणाम् अकर्ता इति अमात्यसंपत्। अतः पादार्धगुणहीनौ मध्यमावरौ।

1.3) पञ्चपुरं नाम नगरमस्ति। तत्रत्यस्य धर्मशीलस्य सत्यशर्मणः पुत्र एव देवशर्मा। अधीतविद्योऽयं पिता यथा न जानीयात् तथा देशान्तरं गत्वा भागीरथीतीरे तपस्तेपे। एकदा गङ्गा तीरे स तपस्वी जपं कर्तुमुपविष्टवान्। तस्मिन् सन्दर्भे उड्डीयमानया कयाचिद् बलाकया तस्योपरि पुरीषोत्सर्गः कृतः। सोऽपि क्रोधेन यदा तामपश्यत् तदा सा दग्धा भूमावपतत्।

P.T.O.

2. अधोनिर्दिष्टपद्यभागेषु द्वयोः अनुवादं कृत्वा स्वारस्यं लिखत। (2×5=10)

2.1) काष्ठादग्निर्जायते मथ्यमानात्
भूमिस्तोयं खन्यमाना ददाति।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयन्ताः फलन्ति।।

2.2) भूभृत्यस्मिन् पक्षिराजेन पूर्वं
श्वेतद्वीपादाहृतां श्वेतमृत्स्नां।
धन्या नित्यं धारयन्तो ललाटे
मालीमस्यं मानसं निर्मृजन्ति।।

2.3) हे हेरम्ब किमम्ब, रोदिषि कुतः कर्णौ लुठत्यग्निभूः
किं ते स्कन्द विचेष्टितं, मम पुरा संख्या कृता चक्षुषाम्।
नैतत्तेऽप्युचितं गजास्य चरितं, प्राक् नासिका मोटिता
श्रुत्वैवं सुतयोर्गिरं गिरिसुता स्मेरानना पातु वः।।

3. चतुर्णां वाक्यानां ससन्दर्भं विवरणं कुरूत। (4×3=12)

3.1) पतञ्जलिं प्राञ्जलिरानतोऽस्मि।

3.2) सहाध्यायिनो अमात्यान् कुर्वीत।

3.3) स लोके लभते कीर्तिं परत्र च शुभां गतिम्।

3.4) लक्ष्मी स्वयं याति निवासहेतोः।

3.5) कोपेन भस्मीकर्तुं नाहं बलाका।

3.6) सा राजते परदेवता।

3.7) शौरेः पदात् गाङ्ग इव प्रवाहः।

3.8) धिक् तां च तं च मदनं च इमां च मां च।

4. द्वयोः संस्कृतेन टिप्पणीं लिखत। (2×3=6)

4.1) श्वशुरगृहनिवासः।

4.2) विश्वगुणादर्शचम्पूः।

4.3) सुभाषितानि।

4.4) मन्त्रस्य अङ्गपञ्चकम्।

5. द्वयोः न्याययोः उक्तिं विशदीकुरुत। (2×3=6)

5.1) अन्धगजन्यायः।

5.2) वधूहस्तमाक्षमापनन्यायः।

5.3) अरण्यरोदनन्यायः।

5.4) पङ्गु-अन्धन्यायः।

6. द्वयोः संस्कृतेन, आंग्लभाषया, कन्नडभाषया वा टिप्पणीं लिखत। (2×5=10)

6.1) अन्तरङ्गसाधनानि।

6.2) शुकेन कृताः उपकाराः।

6.3) रजतपीठपुरम्।

6.4) कविः बिल्हणः।

7. द्वयोः प्रश्नयोः प्रबन्धरूपेण उत्तराणि लिखत। (2×8=16)

7.1) कीदृशान् अमात्यान् कुर्वीत इति कौटिल्यः निरूपयति ? विवृणुत।

7.2) क्रियासिद्धिः सत्त्वे भवति महतामिति सोदाहरणं समर्थयत।

7.3) कुबुद्धेः कुटिलतां सुबुद्धेः चतुरमुपायं च विशदीकुरुत।

7.4) चमत्कारश्लोकान् दृष्टान्तैः सह विशदयत।

8. अधोनिर्दिष्टेषु **षट्** वाक्यानि पाठ्यधारेण पूरयत। (6×1=6)

8.1) अमात्याः सर्व एवेते ____________ ।
(कार्याः कार्यं, कार्यः)

8.2) ____________ धनं प्रयाति निधनम्।
(आलस्येन, आलस्यं, आलस्ये)

8.3) सन्तः ____________ भजन्ते।
(परीक्षितुं, परीक्ष्य, परीक्षितं)

8.4) कुलक्रमागतं धर्मं ____________ पालयति।
(श्रद्धा, श्रद्धायां, श्रद्धया)

8.5) जम्बूफलानि विमले जले ________ ।
(पतति, पतनम्, पतन्ति)

8.6) हेमघटः सोपानमार्गे ________ करोति ।
(शब्दः, शब्दं, शब्दस्य)

8.7) न हि कृतमुपकारं ________ विस्मरन्ति ।
(साधुः, साधुना, साधवः ।

8.8) प्रायः मूढमनसां ________ क्षीयते ।
(मतिः, मत्या, मतेः )

9. संयोजयत । **(4×1=4)**

| | |
|---|---|
| 9.1) योगः | कुमारः सञ्जयः |
| 9.2) हस्ती | दुर्लभम् |
| 9.3) राज्ञी विदुला | चालुक्य चक्रवर्ती |
| 9.4) विद्वान् मित्रम् | चित्तवृत्तिनिरोधः |

________